तत्रानुष्ठानं अगस्त्यसंहितातः संक्षिप्य लिख्यते। कृतप्रातःस्नानादिः।
‘उपोष्य नवमीन्त्वद्य यामेष्वष्टसु राघव।
तेन प्रीतो भव त्वंभो संसारात्त्राहि मां हरे॥’
इति निवेद्य॥
‘कोमलाङ्गं विशालाक्षमिन्द्रनीलसमप्रभम्।
दक्षिणांशे दशरथं पुत्त्रावेक्षणतत्परम्॥
पृष्ठतो लक्ष्मणं देवं सच्छत्रं कनकप्रभम्।
पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ।
अग्रे व्यग्रं हनूमन्तं रामानुग्रहकाङ्क्षिणम्॥’
एवं ध्यात्वा श्रीरामं पूजयेत्। स्नानमन्त्रस्तु।
‘इन्द्रोऽग्निश्च यमश्चैव नैरृतो वरुणोऽनिलः।
कुवेर ईशो ब्रह्माद्दिर्दिक्पालाः स्नापयन्तु ते॥’
अहिरनन्तः। कौशल्यां पूजयेत्। मन्त्रस्तु।
‘रामस्य जननी चासि राममयमिदं जगत्।
अतस्त्वां पूजयिष्यामि लोकमातर्नमोऽस्तु ते॥’
तथा।
‘नमो दशरथायेति पूजयेत् पितरं ततः।
ततोऽनुज्ञाप्य देवेशं परिवारान् समर्चयेत्।
पूर्व्वषट्कोणकोणेषु हृदयादीनि च क्रमात्॥’
हृदयादीनि यथा। रां हृदयाय नमः। रीं शिरसे स्वाहा। रूं शिखायै वषट्। रैं कवचाय हुम्। रौं नेत्राभ्यां वौषट्। रः अस्त्राय फट्। तथा,—
‘हनूमन्तं ससुग्रीवं भरतं सविभीषणम्।
लक्ष्मणाङ्गदशत्रुघ्नं जाम्बवन्तं दलादिषु॥
धृष्टं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्द्धनम्।
अकोपं धर्म्मपालाख्यं सुमन्त्रं दलमध्यतः।
दलाग्रे लोकपालांश्च तदस्त्राणि तदग्रतः॥’
लोकपाला इन्द्रादयो दश। तदस्त्राणि वज्रशक्तिदण्डखड्गपाशाङ्कुशगदाशूलपद्मचक्राणि। मध्याह्ने जन्म भावयेत्।
‘उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्व्वसुदिने मेषं गते पूषणि।
निर्दग्धुं निखिलाः पलाशसमिधो मध्यादयोध्यारणी-
राविर्भूतमभूदपूर्व्वविभवं यत्किञ्चिदेकं महः॥’
पलाशा राक्षसाः।
मत्वैवं वादयेद्वाद्यानर्घ्यं दद्याज्जगत्पतेः।
फलपुष्पाम्बुसंपूर्णं गृहीत्वा शङ्खमुत्तमम्।
अशोकरक्तकुसुमैर्युक्तञ्च तुलसीदलैः॥’
मन्त्रस्तु।
‘दशाननवधार्थाय धर्म्मसंस्थापनाय च।
दानवानां विनाशाय दैत्यानां निधनाय च॥
परित्राणाय साधूनां रामो जातः स्वयं हरिः।
गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितो मम॥
पुष्पाञ्जलिं पुनर्दत्त्वा यामे यामेष्वतन्द्रितः।
पूजयेद्विधिवद्भक्त्या दिवारात्रं नयेद्बुधः॥’
तदयं संक्षेपः। शुद्धायां नक्षत्रयुक्तायां विवादाभावः। विद्धायान्तु एकादशीदिने दशमी पारणयोग्या न चेत् तदा नक्षत्रयोगायोगेऽपि अष्टमीविद्धायाम्। पारणयोग्या चेत् तदा अष्टमीविद्धां त्यक्त्वा परेऽहनि उपवासः।”
इति तिथ्यादितत्त्वम्॥

रामपूगः, पुं, (रामो रमणीयः पूगः।) गुवाकविशेषः। तत्पर्य्यायः। कामीनः २ सुनिपूगः ३ सुरेवटः ४। इति त्रिकाण्डशेषः॥

रामबाणः, पुं, (रामस्य बाण इव सफलत्वात्।) औषधविशेषः। यथा। रसेन्द्रचिन्तामणौ।
“पारदामृतलवङ्गगन्धकं
भागयुग्ममरिचेन मिश्रितम्।
तत्र जातिफलमर्द्धभागिकं
तिन्तिलीफलरसेन मर्द्दितम्॥
वह्निमान्द्यदशवक्त्रनाशनो
रामबाण इति विश्रुतो रसः।
संग्रहग्रहणीकुम्भकर्णक-
मामवातखरदूषणं जयेत्॥
दीयते तु चणकाशुमानतः
सद्य एव जठराग्निदीपनः।
रोचकः कफकुलान्तकारकः
श्वासकासवमिजन्तुनाशनः॥”
पाराभागः १ विषभागः १ लवङ्गभागः १ गन्धकभागः १ मरिचभागः ८ जायफलभागः २। रामबाणो रसोऽजीर्णे। इति भावप्रकाशः॥ (शरदृक्षभेदः। इति राजनिर्घण्टः॥ रामशरश्च॥),

रामभद्रः, पुं, (राम एव भद्रो मङ्गलजनकत्वात्।) श्रीरामः। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। ३४। २३६।
“लोकश्च सर्व्वदा रथ्यस्तत्प्रवादेन किं पुरा।
रामभद्रेण शुद्धापि त्यक्ता देवी न जानकी॥”)

रामलवणं, क्ली, (रामं रमणीयं लवणम्।) शाकम्भरिलवणम्। तत्पर्य्यायः। रोमकम् २ पांशुत्थाकरसम्भवम् ३। इति रत्नमाला॥

रामवल्लभं, क्ली, (रामं रमणीयं वल्लभञ्च।) त्वचम्। इति राजनिर्घण्टः॥ (रामस्य वल्लभम्।) रामप्रिये, त्रि॥

रामवीणा, स्त्री, (रामा रमणीया वीणा।) वीणाविशेषः। यथा, शब्दरत्नावली॥
“कुब्जी च कच्छपीवीणा वीणा तुम्बुरुनारदी।
सारस्वती कैलिकला रामवीणा बलाञ्चिता॥”

रामशरः, पुं, (रामस्य शर इव।) शरवृक्षभेदः। तत्पर्य्यायः। रामकाण्डः २ रामबाणः ३ रामेषुः ४ अपर्व्वदण्डः ५ दीर्घः ६ नृपप्रियः ७। तस्य मूलगुणाः। ईषदुष्णत्वम्। रुचिप्रदत्वम्। रसे अम्लत्वम्। कषायत्वम्। पित्तकारित्वम्। कफवातनाशित्वञ्च। इति राजनिर्घण्टः॥ (रामचन्द्रस्य बाणोऽपि॥)

रामशीतला, स्त्री, आरामशीतला। इति राजनिर्घण्टः॥

रामसखः, पुं, (रामस्य सखा। “राजाहःसखिभ्यष्टच्।” ५। ४। ९१। इति टच्।) सुग्रीवः। इति शब्दरत्नावली॥

रामसेनकः, पुं, भूनिम्बः। (अस्य पर्य्यायो यथा,—
“किराततिक्तः कैरातः कटुतिक्तः किरातकः।
काण्डतिक्तो नार्य्यतिक्तो भूनिम्बो रामसेनकः॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) कट्फलः। इति राजनिर्घण्टः॥

रामा, स्त्री, (रमते रमयतीति वा। रम+ ज्वलादित्वात् णः। टाप्। रमतेऽनयेति। करणे घञ् वा।) उत्तमस्त्रीविशेषः। इत्यमरः। २। ६। ४॥ गीतकलाभी रमते रामा। इति भरतः॥ (यथा, भागवते। ३। २३। ४३।
“विभज्य नवधात्मानं मानवीं सुरतोत्सुकाम्।
रामां निरमयन् रेमे वर्षपूगान् मुहूर्त्तवत्॥”)
योषा। (यथा, रघुः। ५। ४९।
“स च्छिन्नबन्धद्रुतयुग्यशून्यं
भग्नाक्षपर्य्यस्तरथं क्षणेन।
रामापरित्राणविहस्तयोधं
सेनानिवेशं तुमुलं चकार॥”)
हिङ्गु। नदी। इति मेदिनी॥ हिङ्गुलम्। इति शब्दरत्नावली॥ श्वेतकण्टकारी। गृहकन्या। आरामशीतला। अशोकः। गोरोचना। इति राजनिर्घण्टः॥ बाला। गैरिकम्। इति शब्दचन्द्रिका॥

रामायणं, क्ली, (रामस्य चरितान्वितं अयनं शास्त्रम्।) रामेण रावणवधकाव्यम्। इति त्रिकाण्डशेषः॥ तच्च शतकोटिसंख्यकम्। यथा। स्कान्दे पातालखण्डे अयोध्यामाहात्म्ये तत्रत्यतीर्थाश्रमवर्णनप्रस्तावे।
“शापोक्त्या हृदि सन्तप्तं प्राचेतसमकल्मषम्।
प्रोवाच वचनं ब्रह्मा तत्रागत्य सुसत्कृतः॥
न निषादः स वै रामो मृगयाञ्चर्त्तुमागतः।
तस्य संवर्णनेनैव सुश्लोक्यस्त्वं भविष्यसि॥
इत्युक्त्वा तं जगामाशु ब्रह्मलोकं सनातनः।
ततः संवर्णयामास राघवं ग्रन्थकोटिभिः॥”
कोटिभिः शतकोटिभिः। चरितं रघुनाथस्य शतकोटिप्रविस्तरमित्यन्यत्रोक्तेः। तच्च संपूर्णं ब्रह्मलोके इत्येतित्त्वम्॥ इह तु कुशलवोपदिष्टा चतुर्विंशतिसाहस्रीत्यलम्। इति रामायणटीकायां नागोजीभट्टः॥ * ॥ तथा हि।
“प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवान् ऋषिः।
चकार चरितं कृत्स्नं विचित्रपदमर्थवत्॥
चतुर्विंशत्सहस्राणि श्लोकानामुक्तवान् ऋषिः।
तथा सर्गशतान् पञ्च षट् काण्डानि तथोत्तरम्॥
इति रामायणे वाल्मीकीये बालकाण्डे ३ सर्गः॥
संक्षिप्तरामचरित्रं यथा,—
“रामायणमथो वक्ष्ये श्रुतं पापविनाशनम्।
विष्णुनाभ्यब्जजो ब्रह्मा मरीचिस्तत्सुतः स्मृतः॥
मरीचेः कश्यपस्तस्मात् परस्तस्मात् मनुः सुतः।
मनोरिक्ष्वाकुवंशेऽभूद्वंशे राजा रघुः स्मृतः॥
रघोरजस्ततो जातो राजा दशरथो बली।
तस्य पुत्त्रास्तु चत्वारो महाबलपराक्रमाः॥
कौशल्यायामभूद्रामो भरतः कैकयीसुतः।
सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रायां बभूवतुः॥